श्रीसायीश्वराय नमः। हरिः ॐ।

śrīsāyīśvarāya namaḥ | hariḥ om |

## अथ पंचमो न्यासः

## atha pañcamo nyāsaḥ

***The fifth nyāsa consists of 5 parts invoking Sivasalpam as the heart, Purushasuktam as the Head, Uttaranarayanagm as Sikha (back of the head), Ashushshishano as Kavacam (mantras for instillation of divine energy in 6 areas followed by mantras that address the Atma. Symbolic these 7 represent the 7 chakras. This ritual is now connecting the individual to the Atma aspect.***

ये नेदं भूतं भुवनं भविष्यत्परि गृहीत ममृतेन सर्वं। येन यज्ञस्त्रायते सप्तहोता तन्मे मनः शिवसंकल्प मस्तु॥

ye nedaṁ bhūtaṁ bhuvanaṁ bhaviṣyatpari gṛhīta mamṛtena sarvaṁ| yena yajñastrāyate saptahotā tanme manaḥ śivasaṅkalpa mastu||

येन कर्माणि प्रचरन्ति धीर यतो वाचा मनसा चारु यन्ति। यत्सम्मितं मनः संचरंति तन्मे मनः शिवसंकल्प मस्तु॥

yena karmāṇi pracaranti dhīra yato vācā manasā cāru yanti| yatsammitaṁ manaḥ sañcaranti tanme manaḥ śivasaṅkalpa mastu||

येन कर्माण्य पसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः। यदपूर्वं यक्ष्ममन्तं प्रजानां तन्मे मनः शिवसंकल्प मस्तु॥

yena karmāṇya paso manīṣiṇo yajñe kṛṇvanti vidatheṣu dhīrāḥ| yadapūrvaṁ yakṣmamantaṁ prajānāṁ tanme manaḥ śivasaṅkalpa mastu||

यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु। यस्मान्न ऋते किंचन कर्म क्रियते तन्मे मनः शिवसंकल्प मस्तु॥

yatprajñānamuta ceto dhṛtiśca yajjyotirantaramṛtaṁ prajāsu| yasmānna ṛte kiñcana karma kriyate tanme manaḥ śivasaṅkalpa mastu||

सुषरथिरश्वानिवयं मनुष्या न्ने नीयुते पशुभिर्वाजिनीवान्। हृत्प्रतिष्ठं यदचरं यविष्ठं तन्मे मनः शिवसंकल्प मस्तु॥

suṣarathirarśvānivayaṁ manuṣyā nne nīyute paśubhirvājinīvān| hṛtpratiṣṭhaṁ yadacaraṁ yaviṣṭhaṁ tanme manaḥ śivasaṅkalpa mastu||

यस्मिन्नृचस्साम यजूंषि यस्मिन् प्रतिष्ठा रथनाभावि भाराः। यस्मिग्ग्श्चित्तग्ं सर्वमोतं प्रजानां तन्मे मनः शिवसंकल्प मस्तु॥

yasminnṛcassāma yajūgṁṣi yasmin pratiṣṭhā rathanābhāvi bhārāḥ| yasmiggścittagṁ sarvamotaṁ prajānāṁ tanme manaḥ śivasaṅkalpa mastu||

यदत्र षष्ठं त्रिशगं सुवीर्यं यज्ञ्नस्य गुह्यं नवनाव माय्यं। दश पञ्चत्रिगं शतं यत्परं तन्मे मनः शिवसंकल्प मस्तु ॥

yadatra ṣaṣṭhaṁ triśagṁ suvīryaṁ yajñnasya guhyaṁ navanāva māyyaṁ| daśa pajñcatrigṁ śataṁ yatparaṁ tanme manaḥ śivasaṅkalpa mastu||

यज्जाग्रतो दूरमुदैतु सर्वं तत्सुप्तस्य तथैवेति। दूरंगमं ज्योतिषं ज्योतिरेकं तन्मे मनः शिवसंकल्प मस्तु ॥

yajjāgrato dūramudaitu sarvaṁ tatsuptasya tathaiveti| dūraṅgamaṁ jyotiṣaṁ jyotirekaṁ tanme manaḥ śivasaṅkalpa mastu||

येनेदं विश्वं जगतो बभूव ये देवापि महतो जातवेदाः। तदेवाग्नि स्तद्वायु स्तत्सूर्य स्तदुश्चंद्रमा स्तन्मे मनः शिवसंकल्प मस्तु ॥

yenedaṁ viśvaṁ jagato babhūva ye devāpi mahato jātavedāḥ| tadevāgni stadvāyu statsūrya staduścandramā stanme manaḥ śivasaṅkalpa mastu||

येन द्यौः पृथिवी चांतरिक्षं च ये पर्वताः प्रदिशो दिशश्च। ये नेदं जगद्व्याप्तं प्रजानां तन्मे मनः शिवसंकल्प मस्तु ॥

yena dyauḥ pṛthivī cāntarikṣaṁ ca ye parvatāḥ pradiśo diśaśca| ye nedaṁ jagadvyāptaṁ prajānāṁ tanme manaḥ śivasaṅkalpa mastu||

ये मनो हृदयं ये च देवा ये दिव्या आपो ये सूर्यरश्मिः। ते श्रोत्रे चक्षुषी संचरन्तं तन्मे मनः शिवसंकल्प मस्तु ॥

ye mano hṛdayaṁ ye ca devā ye divyā āpo ye sūryaraśmiḥ| te śrotre cakṣuṣī sañcarantaṁ tanme manaḥ śivasaṅkalpa mastu||

अचिन्त्यं चाप्रमेयं च व्यक्ताव्यक्त परं च यत्। सूक्ष्मात् सूक्ष्मतरं ज्ञेयं तन्मे मनः शिवसंकल्प मस्तु ॥

acintyaṁ cāprameyaṁ ca vyaktāvyakta paraṁ ca yat| sūkṣmāt sūkṣmataraṁ jñeyaṁ tanme manaḥ śivasaṅkalpa mastu||

एका च दश च शतं च सहस्रं चायुतं च। नियुतं च प्रयुतम् चार्बुदं च न्यर्बुदं च तन्मे मनः शिवसंकल्प मस्तु ॥

ekā ca daśa ca śataṁ ca sahasraṁ cāyutaṁ ca| niyutaṁ ca prayutam cārbudaṁ ca nyarbudaṁ ca tanme manaḥ śivasaṅkalpa mastu||

ये पंच पंचादश शतगं सहस्र मयुतं न्यर्बुदम् च। ते अग्नि चित्तेष्टकास्तागं शरिरं तन्मे मनः शिवसंकल्प मस्तु ॥

ye pañca pañcādaśa śatagṁ sahasra mayutaṁ nyarbudam ca| te agni citteṣṭakāstāgṁ śariraṁ tanme manaḥ śivasaṅkalpa mastu||

वेदाहमेतं पुरुषं महांत मादित्य वर्णं तमसः परस्तात्। यस्य योनिम् परिपश्यन्ति धीरा स्तन्मे मनः शिवसंकल्प मस्तु ॥

vedāhametaṁ puruṣaṁ mahānta māditya varṇaṁ tamasaḥ parastāt। yasya yonim paripaśyanti dhīrā stanme manaḥ śivasaṅkalpa mastu।।

यस्यैतम् धीराः पुनंति कवयो ब्रह्मणमेतं त्वा वृणुतमिन्दुं। स्थावरं जंगमं द्यौराकशं तन्मे मनः शिवसंकल्प मस्तु ॥

yasyaitam dhīrāḥ punanti kavayo brahmaṇametaṁ tvā vṛṇutamindum। sthāvaraṁ jaṅgamaṁ dyaurākaśaṁ tanme manaḥ śivasaṅkalpa mastu।।

परात्परतरं ब्रह्म तत्पर त्पततो हरिः। यत्पर त्परतोऽधीशं तन्मे मनः शिवसंकल्प मस्तु ॥

parātparataraṁ brahma tatpara tpatato hariḥ। yatpara tparato'dhīśaṁ tanme manaḥ śivasaṅkalpa mastu।।

परात्परतरं चैव तत्पर च्चैव यत्परं। यत्परात्परतो ज्ञेयं तन्मे मनः शिवसंकल्प मस्तु ॥

parātparataraṁ caiva tatpara ccaiva yatparaṁ। yatparātparato jñeyaṁ tanme manaḥ śivasaṅkalpa mastu।।

या वेदादिषु गायत्री सर्वव्यापी महेश्वरी। ऋग्यजुस्सामाधर्वैश्च तन्मे मनः शिवसंकल्प मस्तु ॥

yā vedādiṣu gāyatrī sarvavyāpī maheśvarī। ṛgyajussāmādharvaiśca tanme manaḥ śivasaṅkalpa mastu।।

यो वै देवं महादेवं प्रयतः प्रणव श्शुचिः। यस्सर्वे सर्व वेदैश्च तन्मे मनः शिवसंकल्प मस्तु ॥

yo vai devaṁ mahādevaṁ prayataḥ praṇava śśuciḥ। yassarve sarva vedaiśca tanme manaḥ śivasaṅkalpa mastu।।

प्रयुतः प्रणवोंकारं प्रणवं पुरुषोत्तमं। ओम्कारं प्रणवात्मनं तन्मे मनः शिवसंकल्प मस्तु ॥

prayutaḥ praṇavoṅkāraṁ praṇavaṁ puruṣottamaṁ। omkāraṁ praṇavātmanaṁ tanme manaḥ śivasaṅkalpa mastu।।

योऽसौ सर्वेषु वेदेषु पठ्यते ह्यय मीश्वरः। अकायो निर्गुणो ह्यात्मा तन्मे मनः शिवसंकल्प मस्तु ॥

yo'sau sarveṣu vedeṣu paṭhyate hyaya mīśvaraḥ। akāyo nirguṇo hyātmā tanme manaḥ śivasaṅkalpa mastu।।

गोभिर्जुष्टं धनेन ह्यायुषा च बलेनच। प्रजया पशुभिः पुष्कराक्षं तन्मे मनः शिवसंकल्प मस्तु ॥

gobhirjuṣṭaṁ dhanena hyāyuṣā ca balenaca। prajayā paśubhiḥ puṣkarākṣaṁ tanme manaḥ śivasaṅkalpa mastu।।

त्र्यंबकं यजामहे सुगंधिम् पुष्टिवर्धनं। उर्वारुक मिवबंधना न्मृत्यो र्मुक्षीय मामृतात्तन्मे मनः शिवसंकल्प मस्तु ॥

tryambakaṁ yajāmahe sugandhim puṣṭivardhanaṁ| urvāruka mivabandhanā nmṛtyo rmukṣīya māmṛtāttanme manaḥ śivasaṅkalpa mastu||

कैलासशिखरे रम्ये शंकरस्य शिवालये । देवतास्तत्र मोदन्ति तन्मे मनः शिवसंकल्प मस्तु ॥

kailāsaśikhare ramye śaṅkarasya śivālaye| devatāstatra modanti tanme manaḥ śivasaṅkalpa mastu||

कैलसशिखरा वासा हिमवद्गिरिकन्यका । नीलकंठं त्रिनेत्रं च तन्मे मनः शिवसंकल्प मस्तु ॥

kailasaśikharā vāsā himavadgirikanyakā| nīlakaṇṭhaṁ trinetraṁ ca tanme manaḥ śivasaṅkalpa mastu||

विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोहस्त उत विश्वतस्पात् । सं बाहुभ्यां नमति सं पतत्रै र्द्यावा पृथिवी जनयन्देव एक स्तन्मे मनः शिवसंकल्प मस्तु ॥

viśvataścakṣuruta viśvatomukho viśvatohasta uta viśvataspāt| saṁ bāhubhyāṁ namati saṁ patatrai rdvyāvā pṛthivī janayandeva eka stanme manaḥ śivasaṅkalpa mastu||

चतुरो वेदानधीयीत सर्वशास्त्रमयं विदुः । इतिहासपुराणानां तन्मे मनः शिवसंकल्प मस्तु ॥

caturo vedānadhīyīta sarvaśāstramayaṁ viduḥ| itihāsapurāṇānāṁ tanme manaḥ śivasaṅkalpa mastu||

मा नो महान्तमुत मा नो अर्भकं म न उक्षन्तमुत मा न उक्षितं । मानोऽवधीः पितरं मोत मातरं प्रिया म नस्तनुवो रुद्र रीरिष स्तन्मे मनः शिवसंकल्प मस्तु ॥

mā no mahāntamuta mā no arbhakaṁ ma na ukṣantamuta mā na ukṣitaṁ| māno'vadhīḥ pitaraṁ mota mātaraṁ priyā ma nastanuvo rudra rīriṣa stanme manaḥ śivasaṅkalpa mastu||

मानस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः । वीरान्मा नो रुद्र भामितोऽवधीर् हविष्मन्तो नमसा विधेम ते तन्मे मनः शिवसंकल्प मस्तु ॥

mānastoke tanaye mā na āyuṣi mā no goṣu mā no aśveṣu rīriṣaḥ | vīrānmā no rudra bhāmito'vadhīr haviṣmanto namasā vidhema te tanme manaḥ śivasaṅkalpa mastu||

ऋतगं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गळं । ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नम स्तन्मे मनः शिवसंकल्प मस्तु ॥

ṛtagṁ satyaṁ paraṁ brahma puruṣaṁ kṛṣṇapijñalaṁ| ūrdhvaretaṁ virūpākṣaṁ viśvarūpāya vai namo nama stanme manaḥ śivasaṅkalpa mastu||

कद्रुद्राय प्रचेतसे मीढुष्तमाय तव्यसे । वो चेम शंतमगं हृदे । सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु तन्मे मनः शिवसंकल्प मस्तु ॥

kadrudrāya pracetase mīḍhuṣtamāya tavyase | vo cema śantamagṁ hṛde | sarvo hyeṣa rudrastasmai rudrāya namo astu tanme manaḥ śivasaṅkalpa mastu||

ब्रह्म जज्ञ्नं प्रथमं पुरस्त द्वि सीमतस्सुरुचो वेन आवः। स बुध्निया उपमा अस्य विष्ठास्सतश्च योनिमसतश्च विव स्तन्मे मनः शिवसंकल्प मस्तु ॥

brahma jajñnaṁ prathamaṁ purasta dvi sīmatassuruco vena āvaḥ। sa budhniyā upamā asya viṣṭhāssataśca yonimasataśca viva stanme manaḥ śivasaṅkalpa mastu।।

यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव। य ईशे अस्य द्विपद श्चतुष्पदः कस्मै देवाय हविशा विधेम तन्मे मनः शिवसंकल्प मस्तु ॥

yaḥ prāṇato nimiṣato mahitvaika idrājā jagato babhūva। ya īśe asya dvipada ścatuṣpadaḥ kasmai devāya haviśā vidhema tanme manaḥ śivasaṅkalpa mastu।।

य आत्मदा बलदा यस्य विश्व उपासते प्रसिषं यस्य देवाः। यस्य छायाऽमृतं यस्य मृत्युः कस्मै देवाय हविशा विधेम तन्मे मनः शिवसंकल्प मस्तु ॥

ya ātmadā baladā yasya viśva upāsate prasiṣaṁ yasya devāḥ। yasya chāyā'mṛtaṁ yasya mṛtyuḥ kasmai devāya haviśā vidhema tanme manaḥ śivasaṅkalpa mastu।।

यो रुद्रो अग्नो यो अप्सु य ओषधीषु यो रुद्रो विश्वाभुवनाविवेश तस्मै रुद्राय नमो अस्तु तन्मे मनः शिवसंकल्प मस्तु ॥

yo rudro agno yo apsu ya oṣadhīṣu yo rudro viśvābhuvanāviveśa tasmai rudrāya namo astu tanme manaḥ śivasaṅkalpa mastu।।

गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीं। ईश्वरीगं् सर्वभूतानां तामिहोपह्वये श्रियं तन्मे मनः शिवसंकल्प मस्तु ॥

gandhadvārāṁ durādharṣāṁ nityapuṣṭāṁ karīṣiṇīṁ। īśvarīgṁ sarvabhūtānāṁ tāmihopahvaye śriyaṁ tanme manaḥ śivasaṅkalpa mastu।।

नमकं चमकं चैव पुरुषसूक्तं च यद्विदुः। महादेवं च तत्तुल्यं तन्मे मनः शिवसंकल्प मस्तु ॥

namakaṁ camakaṁ caiva puruṣasūktaṁ ca yadviduḥ। mahādevaṁ ca tattulyaṁ tanme manaḥ śivasaṅkalpa mastu।।

य इदगं शिवसंकल्पगं् सदाध्यायन्ति ब्राह्मणाः। ते परं मोक्षं गमिश्यन्ति तन्मे मनः शिवसंकल्प मस्तु ॥

ya idagṁ śivasaṅkalpagṁ sadādhyāyanti brāhmaṇāḥ। te paraṁ mokṣaṁ gamiśyanti tanme manaḥ śivasaṅkalpa mastu।।

ॐ नमो भगवते रुद्राय ॥ शिव संकल्पगं हृदयाय नमः ॥

om namo bhagavate rudrāya।। śiva saṅkalpagṁ hṛdayāya namaḥ।।